13

1075CH13

# मिश्रिताभ्यास:

**अभ्यास: I**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत—**

पठनम् अतीव अरुचिकरं मन्यमान: सुवीर: हतोत्साह: भूत्वा कक्षस्य एकस्मिन् कोणे विचारमग्न: अतिष्ठत् । तस्य मनसि असफलताया: कारणात् आत्मघातस्य भावना जागृता । दु:खित: भूत्वा आत्मचिन्तनं कुर्वन् स: भित्तिम् आरोहन्तम् एकं पिपीलकं पश्यति, य: पुन: पुन: पतित्वा अपि हतोत्साहित: न भवति, अपि तु सततं प्रयासेन स: अन्तत: भित्तिम् आरोहति तत्रस्थं मिष्टान्नं च प्राप्नोति । तस्य विवेको जागृतो भवति । आत्मन: आत्मघातस्य भावनां निन्दयन् स: चिन्तयति यत् यद्येष पिपीलक: सततप्रयासेन सफल: भवितुं शक्नोति तर्हि न किमपि असम्भवं जगति । एतद्विचिन्त्य स: पठनस्य पुन: पुनरभ्यासं कुर्वन् कक्षायां विशिष्टं स्थानं प्राप्तवान् । तस्मिन् एतत् परिवर्तनं दृष्ट्वा शिक्षक: तस्य प्रशंसां कुर्वन् बोधयति— "वत्स! वीरभोग्या वसुन्धरा । वसुधायां बहूनि वस्तूनि सन्ति परन्तु परिश्रमशीला: वीरा: एव तानि प्राप्नुवन्ति ।"

**अभ्यास:**

**(i) एकपदेन उत्तरत —**

(क) क: हतोत्साह: अभवत्? ..............................

(ख) असफलताया: कारणात् सुवीरस्य मनसि कस्य भावना जागृता? ..............................

(ग) पिपीलक: भित्तौ किं प्राप्नोति? ..............................

(घ) सुवीर: पुन: पुनरभ्यासेन किं स्थानं प्राप्तवान्? ..............................

**(ii) पूर्णवाक्येन उत्तरत —**

(क) सुवीर: आत्मघातस्य भावनां निन्दयन् किं चिन्तयति?

..............................

(ख) के वसुधायां वसूनि प्राप्नुवन्ति?

..............................

© NCERT not to be republished

**(iii) यथानिर्देशम् उत्तरत —**

(क) 'स: अन्तत: भित्तिम् आरोहति'- अत्र किम् अव्यय-पदम्?

....................................................................................................

(ख) 'संसारे' इति पदस्य किं समानार्थकपदम् अनुच्छेदे प्रयुक्तम्?

....................................................................................................

(ग) 'तस्य विवेक: जागृत: अभवत्'- अत्र किं कर्तृपदम्?

....................................................................................................

(घ) 'वसुधायां बहूनि वसूनि सन्ति'- अत्र किं विशेषणपदम्?

....................................................................................................

**2. 'आत्मघात: कस्या: अपि समस्याया: समाधानं न भवति' एतद्विषयम् अधिकृत्य एकम् लघुम् अनुच्छेदं लिखत —**

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

**3. 'पठनस्य के लाभा:' - इति वर्णनं कुर्वन्त: मित्रं प्रति पत्रमेकं लिखत —**

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

....................................................................................................

**4. सन्धिच्छेद: सन्धि: वा क्रियताम् —**

(i) हतोत्साह: ........................+........................

(ii) विवेक:+जागृत: ........................................

© NCERT not to be republished

(iii) स:+अन्तत: ............................+............................

(iv) एतद्विचिन्त्य ................................................

**5. समासं विग्रहं वा कृत्वा वाक्यानि पुन: लिखत—**

(i) सुवीर: हत: उत्साह: यस्य स: भूत्वा एकस्मिन् कोणे तिष्ठति।

..............................................................................................

(ii) तस्य मनसि आत्मघातस्य भावना जागृता।

..............................................................................................

(iii) स: अभ्यासं कुर्वन् कक्षायां विशिष्टं स्थानं प्राप्तवान्।

..............................................................................................

(iv) वत्स! वीरै: भोग्या वसुन्धरा।

..............................................................................................

**6. उचित-प्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत—**

(i) पठनम् अरुचिकरं ........................ (मन्+शानच्) छात्रा: सफला: न भवन्ति।

(ii) सततप्रयासेन मन्दोऽपि सफल:........................ (भू+तुमुन्) शक्नोति।

(iii) अस्मिन् वर्षे अहम् कक्षायां विशिष्टं स्थानं........................। (प्र+आप+क्तवतु)

(iv) पुन: पुन: पतित्वा अपि हतोत्सहित: न........................। (भू+तव्यत्)

**7. प्रदत्तवाक्यानां वाच्यपरिवर्तनम् कृत्वा लिखत—**

(i) सुवीर: एकस्मिन् कोणे तिष्ठति।

..............................................................................................

(ii) पिपीलक: अन्तत: भित्तिम् आरोहति।

..............................................................................................

(iii) शिक्षकेण तस्य प्रशंसा क्रियते।

..............................................................................................

(iv) परिश्रमशीलै: वीरै: एव वसूनि प्राप्यन्ते।

..............................................................................................

**8. प्रदत्तवाक्यानां संस्कृतभाषया अनुवादं कुरुत—**

(i) उसका विवेक जागृत हो जाता है।

..............................................................................................

(ii) उसने वृक्ष पर चढ़ते हुए साँप को देखा।

..............................................................................................



© NCERT not to be republished

(iii) हमें पुन: पुन: पाठों का अभ्यास करना चाहिए।

.......................................................................................................

(iv) मुझे पढ़ना अच्छा लगता है।

.......................................................................................................

**9. प्रदत्तानि वाक्यानि शुद्धानि कृत्वा पुन: लिखत—**

(i) बालक: एकस्मिन् कोणे तिष्ठति। ..............................................

(ii) स: भित्तिम् आरोहन्तं पिपीलकं पश्यति। ..............................................

(iii) वसुधायां बहूनि वसूनि सन्ति। ..............................................

(iv) अहम् उत्साहित: भूत्वा तत्रागच्छम्। ..............................................

## अभ्यास: II

**1. लिखितमनुच्छेदं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत—**

वयं सर्वे सुखम् इच्छाम:। कोऽपि दु:खं नैव इच्छति। अत: दु:खानां विनाश: कथं भवति, इति ज्ञातव्यम्। गीतायाम् अर्जुनं प्रति श्रीकृष्ण: अकथयत्, “प्रसादे सर्वदु:खानां हानिरस्योपजायते।” अत: सर्वेषां दु:खानाम् अभावस्य कृते मनस: प्रसन्नता अत्यावश्यकी वर्तते। विपरीतपरिस्थितिषु ये धैर्यं न त्यजन्ति ते सर्वदा आन्तरिक-प्रसन्नताया: माध्यमेन प्रतिकूलपरिस्थिती: विरुध्य विजयम् अधिगच्छन्ति। प्रियजनस्य रुग्णतायां ये सेवां कृत्वा प्रसन्ना: भवन्ति ते न केवलम् प्रियजनस्य दु:खस्य अपि तु स्वदु:खस्य अपि विनाशं कृत्वा भूयोऽपि प्रसन्ना: भवन्ति, परन्तु ये आत्मन: परस्य वा रोगं, समस्यां वा दृष्ट्वा केवलं हाहाकारं कुर्वन्ति तेषां दु:खेषु वृद्धि: एव भवति। अत: विषाद: कदापि न कर्तव्य: प्रसन्नता च कदापि न त्याज्या।

**(i) एकपदेन उत्तरत —**

(क) प्रसादे केषां हानि: भवति? ..............................................

(ख) ये समस्यायां प्राप्तायां केवलं हाहाकारं कुर्वन्ति तेषां दु:खेषु किं भवति?

..............................................

**(ii) पूर्णवाक्येन उत्तरत —**

(क) प्रतिकूलपरिस्थिती: विरुध्य के विजयम् अधिगच्छन्ति?

.......................................................................................................

(ख) किं कदापि न कर्तव्यं किम् च न त्याज्यम्?

.......................................................................................................

**(iii) निर्देशानुसारम् उत्तरत —**

(क) 'पराजयम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(ख) 'तेषाम् दु:खेषु वृद्धि: भवति' इति वाक्यांशे 'भवति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(ग) 'सर्वेषाम्' इति सर्वनामपदम् अत्र कस्मै प्रयुक्तम्?

(घ) 'स्वस्य' इति पदस्य किं पर्यायपदम् अत्र आगतम्?

**(iv) गद्यांशस्य कृते समुचितं शीर्षकं लिखत।**

**2. प्रसन्नताया: महत्त्वविषये पञ्चवाक्यमितम् अनुच्छेदं सरलसंस्कृतेन लिखत-**

**3. गृहे पितु: रुग्णताया: कारणेन भवत:/भवत्या: मित्रम् दु:खित: अस्ति। तं सान्त्वयन्त: पत्रमेकं सरलसंस्कृतेन लिखत—**

© NCERT not to be republished

**4. अधोलिखितवाक्येषु रेखांकितपदानि अधिकृत्य सन्धिं/सन्धिविच्छेदं कुरुत—**

(i) हाहाकारेण तु दु:खेषु वृद्धि:+एव भवति। ..........

(ii) मनस: प्रसन्नता तु अत्यावश्यकी। .......... + ..........

(iii) क: + अपि दु:खं नैव इच्छति। ..........

(iv) विषाद: कदापि न कर्तव्य:। .......... + ..........

(v) वृद्धानां सेवां कृत्वा प्रसन्नो भव। .......... + ..........

(vi) वयं सर्वे सुखम्+इच्छाम:। ..........

**5. रेखांकितपदानां समस्तपदं विग्रहं वा कृत्वा वाक्यानि पुन: लिखत—**

(i) दु:खानां विनाश: कथं भवति इति ज्ञातव्यम्।

..........

(ii) नीतिषु लाभालाभौ न विचारणीयौ।

..........

(iii) दु:खानाम् अभाव: मनस: प्रसन्नतायै आवश्यक:।

..........

**6. उचितप्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत—**

(i) दु:खानां विनाशस्य उपायं ज्ञा + तव्यत्। ..........

(ii) प्रियजनस्य रुग्णता दु:खदायिका। .......... + ..........

(iii) रोगं दृष्ट्वा केवलं हाहाकारं न कर्तव्यम्। .......... + ..........

(iv) त्वं प्रतिकूलपरिस्थितीं वि+रुध्+ल्यप् विजयं प्राप्नुहि। .......... + ..........

**7. प्रदत्तवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत—**

(i) गीतायां श्रीकृष्ण: अर्जुनं प्रति कथयति।

..........

(ii) वयं सर्वे सुखम् इच्छाम:।

..........

(iii) विनम्रजन: पितरं सेवते।

..........

(iv) पुत्रेण औषधै: पितु: रोगविनाशस्य प्रयत्न: क्रियते।

..........

**8. प्रदत्तवाक्यानां संस्कृतभाषया अनुवादं कुरुत—**

(i) हम सभी सुख चाहते हैं।

..........................................................................................

(ii) मन की प्रसन्नता कभी नहीं छोड़नी चाहिए।

..........................................................................................

(iii) गीता में श्रीकृष्ण ने अर्जुन से कहा।

..........................................................................................

(iv) वह प्रियजन की रुग्णता में सेवा करके प्रसन्न होता है।

..........................................................................................

**9. प्रदत्तानि वाक्यानि शुद्धानि कृत्वा पुन: लिखत—**

(i) मूर्खा: जना: दु:खं दृष्ट्वा केवलं हाहाकारं करोति।

..........................................................................................

(ii) दु:खानाम् अभावस्य कृते मनस: प्रसन्नता अत्यावश्यकी वर्तते।

..........................................................................................

(iii) रोगं समस्यां वा दृष्ट्वा तस्य समाधानं कुरु।

..........................................................................................

(iv) विषाद: कदापि न कर्तव्य:।

..........................................................................................

© NCERT not to be republished